श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टादशः सर्गः ॥

## रावणेन मरुत्तस्य पराजय इन्द्रादिभिर्मयूरादिभ्यो वरदानं च

प्रविष्टायां हुताशं तु वेदवत्यां स रावणः।
पुष्पकं तु समारुह्य परिचक्राम मेदिनीम्॥ **7.18.1** ॥

ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः।
उशीरबीजमासाद्य ददर्श स तु रावणः॥ **7.18.2** ॥

संवर्तो नाम ब्रह्मर्षिः साक्षाद् भ्राता बृहस्पतेः।
याजयामास धर्मज्ञः सर्वैर्देवगणैर्वृतः॥ **7.18.3** ॥

दृष्ट्वा देवास्तु तद् रक्षो वरदानेन दुर्जयम्।
तिर्यग्योनिं समाविष्टास्तस्य धर्षणभीरवः॥ **7.18.4** ॥

इन्द्रो मयूरः संवृत्तो धर्मराजस्तु वायसः।
कृकलासो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥ **7.18.5** ॥

अन्येष्वपि गतेष्वेवं देवेष्वरिनिषूदन।
रावणः प्राविशद् यज्ञं सारमेय इवाशुचिः॥ **7.18.6** ॥

तं च राजानमासाद्य रावणो राक्षसाधिपः।
प्राह युद्धं प्रयच्छेति निर्जितोऽस्मीति वा वद॥ **7.18.7** ॥

ततो मरुत्तो नृपतिः को भवानित्युवाच तम्।
अवहासं ततो मुक्त्वा रावणो वाक्यमब्रवीत्॥ **7.18.8** ॥

अकुतूहलभावेन प्रीतोऽस्मि तव पार्थिव।
धनदस्यानुजं यो मां नावगच्छसि रावणम्॥ **7.18.9** ॥

त्रिषु लोकेषु कोऽन्योऽस्ति यो न जानाति मे बलम्।
भ्रातरं येन निर्जित्य विमानमिदमाहृतम्॥ **7.18.10** ॥

ततो मरुत्तः स नृपस्तं रावणमथाब्रवीत्।
धन्यः खलु भवान् येन ज्येष्ठो भ्राता रणे जितः॥ **7.18.11** ॥

न त्वया सदृशः श्लाघ्यस्त्रिषु लोकेषु विद्यते।
कं त्वं प्राक्केवलं धर्मं चरित्वा लब्धवान् वरम्॥ **7.18.12** ॥

श्रुतपूर्वं हि न मया भाषसे यादृशं स्वयम्।
तिष्ठेदानीं न मे जीवन् प्रतियास्यसि दुर्मते॥ **7.18.13** ॥

अद्य त्वां निशितैर्बाणैः प्रेषयामि यमक्षयम्।
ततः शरासनं गृह्य सायकांश्च नराधिपः॥ **7.18.14** ॥

रणाय निर्ययौ क्रुद्धः संवर्तो मार्गमावृणोत्।
सोऽब्रवीत् स्नेहसंयुक्तं मरुत्तं तं महानृषिः॥ **7.18.15** ॥

श्रोतव्यं यदि मद्वाक्यं सम्प्रहारो न ते क्षमः।
माहेश्वरमिदं सत्रमसमाप्तं कुलं दहेत्॥ **7.18.16** ॥

दीक्षितस्य कुतो युद्धं क्रोधित्वं दीक्षिते कुतः।
संशयश्च जये नित्यं राक्षसश्च सुदुर्जयः॥ **7.18.17** ॥

स निवृत्तो गुरोर्वाक्यान्मरुत्तः पृथिवीपतिः।
विसृज्य सशरं चापं स्वस्थो मखमुखोऽभवत्॥ **7.18.18** ॥

ततस्तं निर्जितं मत्वा घोषयामास वै शुकः।
रावणो जयतीत्युच्चैर्हर्षान्नादं विमुक्तवान्॥ **7.18.19** ॥

तान् भक्षयित्वा तत्रस्थान् महर्षीन् यज्ञमागतान्।
वितृप्तो रुधिरैस्तेषां पुनः सम्प्रययौ महीम्॥ **7.18.20** ॥

रावणे तु गते देवाः सेन्द्राश्चैव दिवौकसः।
ततः स्वां योनिमासाद्य तानि सत्त्वानि चाब्रुवन्॥ **7.18.21** ॥

हर्षात् तदाब्रवीदिन्द्रो मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्मज्ञ भुजङ्गाद्धि न ते भयम्॥ **7.18.22** ॥

इदं नेत्रसहस्रं तु यत् तद् बर्हे भविष्यति।
वर्षमाणे मयि मुदं प्राप्स्यसे प्रीतिलक्षणाम्॥ **7.18.23** ॥

एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः॥ **7.18.24** ॥

नीलाः किल पुरा बर्हा मयूराणां नराधिप।
सुराधिपाद् वरं प्राप्य गताः सर्वेऽपि बर्हिणः॥ **7.18.25** ॥

धर्मराजोऽब्रवीद् राम प्राग्वंशे वायसं प्रति।
पक्षिंस्तवास्मि सुप्रीतः प्रीतस्य वचनं शृणु॥ **7.18.26** ॥

यथान्ये विविधै रोगैः पीड्यन्ते प्राणिनो मया।
ते न ते प्रभविष्यन्ति मयि प्रीते न संशयः॥ **7.18.27** ॥

मृत्युतस्ते भयं नास्ति वरान् मम विहङ्गम।
यावत् त्वां न वधिष्यन्ति नरास्तावद् भविष्यसि॥ **7.18.28** ॥

ये च मद्विषयस्था वै मानवाः क्षुधयार्दिताः।
त्वयि भुक्ते सुतृप्तास्ते भविष्यन्ति सबान्धवाः॥ **7.18.29** ॥

वरुणस्त्वब्रवीद्धंसं गङ्गातोयविचारिणम्।
श्रूयतां प्रीतिसंयुक्तं वचः पत्ररथेश्वर॥ **7.18.30**॥

वर्णो मनोरमः सौम्यश्चन्द्रमण्डलसन्निभः।
भविष्यति तवोदग्रः शुद्धफेनसमप्रभः॥ **7.18.31**॥

मच्छरीरं समासाद्य कान्तो नित्यं भविष्यसि।
प्राप्स्यसे चातुलां प्रीतिमेतन्मे प्रीतिलक्षणम्॥ **7.18.32**॥

हंसानां हि पुरा राम न वर्णः सर्वपाण्डुरः।
पक्षा नीलाग्रसंवीताः क्रोडाः शष्पाग्रनिर्मलाः॥ **7.18.33**॥

अथाब्रवीद् वैश्रवणः कृकलासं गिरौ स्थितम्।
हैरण्यं सम्प्रयच्छामि वर्णं प्रीतस्तवाप्यहम्॥ **7.18.34**॥

सद्रव्यं च शिरो नित्यं भविष्यति तवाक्षयम्।
एष काञ्चनको वर्णो मत्प्रीत्या ते भविष्यति॥ **7.18.35**॥

एवं दत्त्वा वरांस्तेभ्यस्तस्मिन् यज्ञोत्सवे सुराः।
निवृत्ते सह राज्ञा ते पुनः स्वभवनं गताः॥ **7.18.36**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टादशः सर्गः॥